

गुरु परम्परा

हर हर शंकर जय जय शंकर कालटि शंकर कामाक्षी शंकर कामकोटी शंकर

नारायणः पद्मभवो वसिष्ठः शक्तिश्च तत्पुत्र पराशरश्च ।

व्यासः शुको गौडपदो यमीन्द्रो गोविन्दयोगीति गुरुक्रमोऽयम् ॥

आद्यः श्रिशङ्कराचार्यो भगवत्पादसंज्ञकः ।

अवतीर्णः शंभुरिति प्रथितः श्रिआर्याम्बाल् शिवगुरो पुत्रः कालटीपदे ॥

सुरेश्वर: पद्मपादो हस्तामलक तोटकौ ।

सर्वज्ञश्चेति तच्छिष्याः प्रथिता गुरु सन्निभाः ॥

शङ्करः कामकोट्याख्यं पीठं काञ्च्यां व्यराजयत् ।

प्रत्यस्थापयदद्वैतम् पीठे सर्वज्ञकेस्थितः ॥

आत्मानमनु सर्वज्ञं सुरेश्वरमते स्थितम्

गोप्तारं कामकोट्याख्य पीठस्य व्यदधाद्गुरुः

तदाद्येन्द्रसरस्वत्याख्याऽविच्छिन्ना परंपरा

पाति नो गुरुवर्याणां शारदामठसुस्थिता

अष्टषष्टितमाचार्यः श्रीमहालक्ष्मी गर्भधृतः सुब्रमण्यात्मजः

जयाब्दवैशाखजातः प्रतिपत्तिथिसंभवः अनुराधाभवः अजः अप्रमेयः

शिष्य श्रीजयेन्द्रो प्रशिष्य श्रीविजयेन्द्रेद्यो गुरोप्रेरकेच्छाशक्तिः

परमपूज्य श्रीचरण: शङ्कर: जगद्गुरो परमाचार्य महास्वामी महापेरियवा विराजते

ब्रह्म भूतः पुर: स्फुरिथभातनु: सर्व व्यापिस्थित: ध्यायामि तमहर्निशं

सदाशिवसमारम्भां शङ्कराचार्यमध्यमाम् |

अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ||

गुरवे सर्व लोकानां भिषजे भवरोगिणाम्

निधये सर्व विद्यानां दक्षिणामूर्तये नम:

गुरुर्ब्रह्मा गुरुर्विष्णु: गुरुर्देवो महेश्वरः ।

गुरु: साक्षात्परं ब्रह्म तस्मै श्रीगुरवे नमः ॥१॥

श्रुतिस्मृतिपुराणानाम् आलयं करुणालयम् ।

नमामि भगवत्पादशङ्करं लोकशङ्करम् ॥

दयमानदीर्घनयना देशिकताऽभीति भव्यदक्षकरा

वामकरनिहित दण्डा भाति पुर: सा गुरोर्मूर्ति:]\

अपारकरुणासिन्धुं ज्ञानदं शान्तरूपिणम् ।
श्रीजगद्गुरुं प्रणतोऽस्मि मुदाऽन्वहम् ॥

परित्यज्य मौनं वटाधःस्थितिं च व्रजन्भारतस्य प्रदेशात्प्रदेशम् ।
मधुस्यन्दिवाचा जनान् धर्ममार्गे नयन् श्रीजयन्द्रो गुरुर्भाति चित्ते ॥

नमामः शङ्करान्वाख्य विजयेन्द्रसरस्वतीम् ।
श्रीगुरुं शिष्टमार्गानुनेतारं सन्मतिप्रदम् ॥

हर हर शंकर जय जय शंकर कालटि शंकर कामकोटी शंकर